कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 736 विषय स्तोत्र

नाव. गुरुगीता

लेखक/लिपीकार —

पृष्ठ 36 काळ शके १७३४ पूर्ण/अपूर्ण

॥ इदं पुस्तकं गुरु गीता प्रारंभः ॥

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥
श्रीगुरुभ्योनमः॥ श्रीरामसर्वज्ञायन
मः॥ अस्य श्रीगुरुगीतामालामंत्रस्य
भगवान्सदाशिवऋषिः॥ अनुष्टु

प्छंदः॥ श्रीगुरूपरमात्मादेवता॥ गुरु
वक्त्रे स्थितं ब्रह्मेतिबीजं॥ तस्मात्स
र्वं परित्यज्येतिशक्तिः॥ गुरुरेवजग
त्सर्वमितिकीलकं॥ ममसकलपुरुष

२

गुरुप्रसादसिध्यर्थे गुरुगीताजपे वि
नियोगः॥ ॐ ध्यानमूलं गुरोर्मूर्ति
रि अंगुष्ठाभ्यां नमः॥ ॐ पूजामूलं गु
रोपदं मिति तर्जनीभ्यां नमः॥ ॐ मं
त्रमूलं गुरोर्वाक्यमिति मध्यमाभ्यां नमः॥

२

ॐ मोक्षमूलं गुरोः कृपेति अनामिका
भ्यां नमः॥ ॐ गुरुरादिरनादिश्चेति क
निष्ठिकाभ्यां नमः॥ ॐ गुरुः परमदैव
तमिति करतलकरपृष्ठाभ्यां नमः॥ एवं
हृदयादिषडंगन्यासं कृत्वा॥ अथ ध्यानं॥

वराभयं व्यास्तकरांबुजद्वयं श्वेतांबरं
श्वेतस्त्रपुष्पमालिनं ॥ द्विनेत्रप प्रस्मि
तस्फुरद्दराननं नारायणाख्यं गुरुराजमी
ड्ये ॥ १ ॥ यस्यबोधादयासर्वं ब्रह्मैवेत्यव
गम्यते ॥ शिवरामेतिविख्यातं तद्दैवतमु

पास्महे ॥ २ ॥ संतोषंचगुरुंवंदे परसं
विप्रदायकं ॥ शांतिसिंहासनारूढमा
नंदामृतभोगदं ॥ ३ ॥ सूतउवाच ॥
कैलासशिखरे रम्ये भक्तिसाधननाय
कः ॥ प्रणम्य पार्वती भक्त्या शंकरं परि

४

पृछति ॥१॥ पार्वत्योवाच ॥ ॐ नमोदेवदे
वेशपरात्परजगद्गुरो ॥ सदाशिवमहादे
वगुरुदीक्षांप्रदेहिमे ॥२॥ केनमार्गेण
भोस्वामिन्देहिब्रह्ममयोभवेत् ॥ कुरु
मेनुग्रहंदेवनमामिचरणौतव ॥३॥

४

शिवउवाच ॥ ममरूपासिदेवित्वं त्वद्भ
क्त्यातुद्वदाम्यहं ॥ लोकोपकारकः प्रश्नः
कृतःकेनापिनोपुरा ॥४॥ दुर्लभंत्रिषु
लोकेषु यत्तच्छृणु ममप्रिये ॥ गुरुमार्ग
विनासम्यग्देहिनोनास्तितत्सुखं ॥५॥

५

वेदशास्त्रपुराणानि सेतिहासादिका-
नि च ॥ मंत्रयंत्रादयो विद्या मोहनोच्चा-
टनादिकं ॥६॥ शैवशाक्तादयो मार्गा
अन्ये च बहवो मताः ॥ अपभ्रंशाः सम-
स्तानां जीवानां भ्रांतचेतसां ॥७॥ यज्ञो

५

व्रतं तपो दानं जपस्तीर्थं तथैव च ॥
सर्वेषामेव जंतूनां सर्वे मार्गाः प्रतार-
काः ॥८॥ गुरुबुध्यात्मनो नान्यत्सत्यं
देवि न संशयः ॥ तल्लाभार्थं प्रयत्नस्तु
कर्त्तव्योत्र मनीषिभिः ॥९॥ गूढविद्याया

जगन्मायादेहे विज्ञानसंज्ञिता॥ उदि
तास्वप्रकाशेन गुरुशब्देन कथ्यते॥१९॥
देही ब्रह्म भवेत स्मात्तदेव प्रवदामि ते॥
 सर्वपापविशुध्यर्थं भजे गुरुपदांबुजं
॥२०॥ सर्वतीर्थावगाहस्य संप्राप्नोति फ

लं नरः॥ गुरुपादांबुजं स्मृत्वा जलं शिर
सि धारयेत्॥२२॥ शोषणं पापपंकस्य दी
पनं ज्ञानतेजसा॥ गुरुपादोदकं दे विज
न्मकर्मविनाशनं॥२३॥ अज्ञानमूलह
रणं जन्मकर्मनिवारणं॥ ज्ञानवैराग्य

सिध्यर्थं गुरुपादोदकं पिबेत् ॥१४॥ गुरु
पादोदकं पीत्वा भुक्त्वा गुरुप्रसादजं ॥ गु
रुमूर्तिं सदा ध्याये गुरुमंत्रं सदा जपे
त् ॥१५॥ काशीक्षेत्रं निवासंच जान्हवी
चरणोदकं ॥ गुरुर्विश्वेश्वरः साक्षात्ता

८ ८

रकं ब्रह्म निश्चितं ॥१६॥ पादुदके तस्य
पादांके गयाते सोक्षयो वट ॥ तीर्थराजः
प्रयागो सो गुरुमूर्त्यै नमो नमः ॥१७॥ गु
रुमूर्तिं स्मरे नित्यं गुरुनाम सदा जपेत् ॥
गुरोराज्ञां प्रकुर्वीत गुरोरन्यं न भावयेत् ॥१८॥

गुरुवक्त्रे स्थिता विद्या गुरुभक्त्या च
लभ्यते॥ तस्मात्तं देशिकं ध्यायेद्यथा से
वां गनास्वकं॥१९॥ स्वाश्रमं च स्वजातिं
च स्वकीर्तिं पुष्टिवर्द्धनं॥ अन्यत्सर्वं प
रित्यज्य गुरुमेव समाश्रयेत्॥२०॥

८

८

अनन्याश्चिंतयंतो ये गुरुस्तेषां परं पदं॥
तस्मात्सर्वप्रयत्नेन गुरोराराधनं कुरु
॥२१॥ गुरोर्मुखाच्च देवेशि प्राप्य ब्रह्मता
त्म संविदं॥ त्रैलोक्यस्फुटवक्तारो देवर्षि
पितृमानवाः॥२२॥ गुरुकांतासावं चक्रा

रोरुकारेस्तेजउच्यते॥ आज्ञानग्रासकं
नामगुरोरत्रप्रकाशितं॥२३॥ गुकार:प्र
थमःशब्दो मायादिकगुणाश्रित:॥रु ९ ९
कारत्नपर:शब्दोमायादिगुणनाशक:॥२४॥
एवं गुरुपदंश्रेष्ठंदेवानामपिदुर्लभं॥

हाहाहूहूगणानांचगंधर्वाणांचसर्व
श:॥२५॥ एवंतेषांचसर्वेषांनास्तित
त्वंगुरो:परं॥ आसनंशयनंवस्त्रंवाहना
दिविभूषणं॥ साधकेनप्रदातव्यंगुरो:
संतोषकारणं॥ गुरोराराधनंकार्यंस्व

१०

जीवित्वं निवेदयेत् ॥२७॥ कर्मणा मनसा
वाचा नियमाराधयेद्गुरुं ॥ दीर्घदंडं नम
स्कारं निर्लज्यं गुरुसंन्निधौ ॥२८॥ शरी
रमर्थसंप्राप्तं राज्यं वैषयिकं सुखं ॥ आ
त्मदारादिकं सर्वमाचार्याय निवेदयेत् ॥२९॥

१०

क्रिमिकीटभस्मविष्टादुर्गंधिमलमूत्र
कं ॥ श्लेष्मरक्तात्मकं देहं वंचयेन्नवरान
ने ॥३०॥ संसारवृक्षमारूढा पततो न
रकार्णवे ॥ सर्वं येनोधृता लोकास्तस्मै
श्रीगुरवे नमः ॥३१॥ गुरुर्ब्रह्मा गुरुर्वि

ष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेव परं ब्र
ह्म तस्मै श्री गुरवे नमः ॥२२॥ अज्ञान
तिमिरांधस्य ज्ञानांजनशलाकया ॥ च
क्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ॥२३॥
अखंडमंडलाकारं व्याप्तं येन चराचरं ॥

तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥२४॥
सर्वश्रुतिशिरोरत्नविराजितपदांबु
जः ॥ वेदांतांबुजसूर्याय तस्मै श्री गुर
वे नमः ॥२५॥ यस्य स्मरणमात्रेण ज्ञान
मुत्पद्यते स्वयं ॥ ज्ञानस्य कारणं सम्यक्

१२

तस्मैश्रीगुरवेनमः ॥३६॥ चैतन्यं शाश्वतं
शांतं व्योमातीतं निरंजनं ॥ नादबिंदुक
लातीतं तस्मैश्रीगुरवेनमः ॥३७॥ अनचू
रं स्थावरं शातंजंगमंचरमेवच ॥ व्याप्त
येनजगत्सर्वं तस्मैश्रीगुरवेनमः ॥३८॥

१२

ज्ञानशक्तिसमारूढं तत्वमालाविभूषि
तं ॥ भुक्तिमुक्तिप्रदातारं वंदेज्ञानैकवि
ग्रहं ॥३९॥ नगुरोरधिकंतत्वं नगुरोर
धिकंतपः ॥ तत्वज्ञानस्वरूपायतस्मै
श्रीगुरवेनमः ॥४०॥ मन्नाथश्रीजन्नाथो

मद्गुरुःश्रीजगद्गुरुः॥मदात्मासर्वभूता
त्मातस्मैश्रीगुरवेनमः॥४१॥ध्यानमूलं
गुरोर्मूर्तिःपूजामूलंगुरोःपदं॥मंत्र
मूलंगुरोर्वाक्यंमोक्षमूलंगुरोःकृपा॥४२॥
गुरुरादिरनादिश्चगुरुःपरमदैवतं॥

गुरुमंत्रसमोनास्तितस्मैश्रीगुरवेन
मः॥४३॥सप्तसागरपर्यंतीर्थस्नानेन
यत्फलं॥गुरोरंघ्रिबिंदुजलंतत्फलं
प्रददातिहि॥४४॥गुरुरेवजगत्सर्वं
ब्रह्माविष्णुःशिवात्मकं॥गुरोःपरत

तरं नास्तितस्मैश्रीगुरवेनमः॥४५॥भ
वारण्यप्रविष्टस्यदिङ्मोहभ्रांतचेतसः॥
येनसंदर्शितःपंथास्तस्मैश्रीगुरवेनमः॥
१४ ॥४६॥तापत्रयाग्नितप्तानांश्रांतानांप्राणि १४
नामुमे॥गुरुरेवपरागंगातस्मैश्रीगु

रवेनमः॥४७॥अज्ञानेनाहिनाग्रस्ताः
प्राणिनस्तच्चिकित्सकः॥विद्यास्वरूपो
भगवान्तस्मैश्रीगुरवेनमः॥४८॥
ज्ञानंविनामुक्तिपदंलभ्यतेगुरुभक्ति
तः॥कायेनमनसावाचागुरुमाराध

येबुधः॥४९॥गुरोःकृपाप्रसादेनब्रह्मा
विष्णुशिवात्मकाः॥समर्थाःसृष्टिकर्त्ता
रः प्रभवोगुरुसेवया॥५०॥देवकिंन्नर
गंधर्वाःपितरोयक्षचारणाः॥मुनयो
पिनजानंतिगुरुशुश्रूषणेविधि॥५१॥

महाहंकारगर्वेणतपोविद्याबलान्वि
ताः॥संसारकुहरावर्त्तेपतिताघटयं
त्रवत्॥५२॥नमुक्तादेवगंधर्वाःपितरो
यक्षकिंन्नराः॥ऋषयःसर्वसिद्धाश्चगु
रुसेवापराङ्मुखाः॥५३॥ध्यानंशृणुम

१८

हादेवी सर्वानंदप्रदायकं ॥ सर्वसौख्यक
रं देवी भुक्तिमुक्तिस्ववर्द्धनं ॥५४॥ श्रीम
त्परं ब्रह्मगुरुं स्मरामि श्रीमत्परं ब्रह्म
गुरुं वदामि ॥ श्रीमत्परं ब्रह्मगुरुं भजा
मि श्रीमत्परं ब्रह्मगुरुं नमामि ॥५५॥

१८

ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिल
क्ष्यं ॥ एकं नित्यं विमलमचलं सर्वधीसा
क्षिभूतं भावातीतं त्रिगुणरहितं सद्गुरुं
तं नमामि ॥५६॥ ज्ञानंदमानंदकरं प्रस

७

न्नं ज्ञानस्वरूपं निजबोधयुक्तं॥ योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि॥ ५७॥ नित्यं शुद्धं निराभासं निराकारं निरंजनं॥ नित्यबोधं चिदानंदं गुरुं ब्रह्म नमाम्यहं॥ ५८॥ हृदंबुजे

७

त्कर्णिकमध्यसंस्थं सिंहासनारूढ स्फुरैखे दिव्य मूर्तिं॥ ध्यायेद्गुरुं चंद्रप्रभाभं चित्पुस्तकाभिष्ववरान्दधानं॥ ५९॥ श्वेतांबरं श्वेतविलेपपुष्पं मुक्ताविभूषं मुदितं द्विनेत्रं॥ वामांकपीठस्थितदिव्यशक्तिं

शाला

मंदस्मितं सांद्रकृपानिधानं ॥९०॥ प्रातः शि
रसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुं ॥ व
राभययुतं शांतं स्मरेत्तं नामपूर्वकं ॥९१॥
यस्मिन्सृष्टिस्थितिध्वंसनिग्रहानुग्रहा
त्मकं ॥ कृत्यं पंचविधं शश्वद्भासते तं न

माम्यहं ॥९२॥ न गुरोरधिकं न गुरोरधि
कं न गुरोरधिकं न गुरोरधिकं ॥ शिवशा
सनतः शिवशासनतः शिवशासनतः
शिवशासनतः ॥९३॥ एवंविधगुरुध्या
नात् ज्ञानमुत्पद्यते स्वयं ॥ तदा गुरुप्रसा

देन मुक्तो भवति पार्वति ॥ ९४ ॥ गुरुरुक्तमा
र्गेत श्रोहो मनःशुद्धं विधायच ॥ अन्य
त्यं खंडयेत्सर्वं यत्किंचिदात्मगोचरं ॥ ९५ ॥
ज्ञेयं सर्वं विबुध्येत हिसुद्धज्ञानयोगतः ॥
ज्ञातत्त्वमपि निर्ध्मीयान्नान्यःपंथाद्वि

तीयकः ॥ ९६ ॥ एवं ज्ञात्वा पुनर्देवि गु
रुनिंदां करोति यः ॥ स याति नरकं घोरं
यावच्चंद्रदिवाकरं ॥ ९७ ॥ यावत्कल्पां
तकोदेहस्तावद्देव गुरुं स्मरेत ॥ गुरु
लोपो न कर्त्तव्यः स्वच्छंदोपि भवेद्यदि ॥ ९८ ॥

हूं हूं कारो न कर्त्तव्यः शिष्येण गुरुसन्मु
खे ॥ गुरोरग्रे न वक्तव्यमसत्यं च कदा
चन ॥ ६९ ॥ गुरुं त्वंकृत्य हुंकृत्य गुरुं
निर्जित्य वादतः ॥ अरण्ये निर्जले देशे

स भवेद्ब्रह्मराक्षसः ॥ ७० ॥ मुनिभिः प

२०

न्नगैर्वापि सुरैर्वा शापितो यदि ॥ कालमृ
त्युभयाद्वापि गुरुणा रक्षितो भवेत् ॥ ७१ ॥
अशक्ता हि गताः सर्वे समर्था मुनयस्त
था ॥ गुरुशापेन ते शीघ्रं क्षयं यांति न सं
शयः ॥ ७२ ॥ मंत्रराजमिदं देवि गुरुरित्यक्ष

रद्वयं ॥ स्मृतिवेदार्थवाक्यानां गुरुः सा
क्षात्परं पदं ॥७३॥ अस्याचार्य विचारेण
गुरुभक्ता भवंति ये ॥ ते वै सन्यासिनः प्रो
क्ता इतरे वेषधारिणः ॥७४॥ नित्यं ब्रह्म नि
राकारं क्षेण प्राप्तं सेवेगुरुं ॥ शिष्यं प्राप

यति प्राप्यं दीपो दीपांतरं यथा ॥७५॥
गुरोः कृपा प्रसादेन स्वात्मारामं निरीक्ष
ये ॥ अनेन मोक्षमार्गेण निज ज्ञानं प्र
काशंते ॥७६॥ अब्रह्मस्तंभपर्यंतं पर
मात्मस्वरूपकं ॥ चराचरमयं देवं देवि

कं प्रणमाम्यहं ॥७७॥ वंदे हं सच्चिदानं
२२ दं भेदातीतं सदा गुरुं ॥ नित्यं पूर्णं निराका
रं निर्गुणं स्वात्मसंस्थितं ॥७८॥ परात्परत
रं ध्येयं नित्यमानंदकारकं ॥ हृदयाकाश २२
मध्यस्थं शुद्धस्फटिकसंन्निभं ॥७९॥ स्फ

टिकप्रतिमारूपं दृश्यते दर्पणे यथा ॥
तथात्मनि चिदाकारानंदः सोहं प्रकाश
कः ॥८०॥ अंगुष्ठमात्रं पुरुषं ध्यायतश्चि
न्मयं हृदि ॥ तत्र स्फुरति भावो यः श्रृणु
तं कथयाम्यहं ॥८१॥ अगोचरं तथागम्यं

नामरूपविवर्जितं॥ तदहं ब्रह्मकैवल्यमि
तिबोधः प्रजायते॥८२॥ यथा नि संस्व
भावेन कुंडलं कंकणादयः॥ सुवर्णत्वे
न तिष्ठंति तथाहं ब्रह्म शाश्वतं॥८३॥
एवं ब्रह्मपरो भूत्वा यत्र क्वापि वसेन्न

र:॥ तद्ध्यानेन तद्देवासौ भवेत्कीटोय
थालिः॥८४॥ गुरुध्यानपरा ये ते ब्रह्म
ज्ञानपरायणाः॥ योगे विरागे भोगे च
मुक्तास्ते नात्र संशयः॥८५॥ तेषामेवा
वलोकेन संसर्गेण च पार्वती॥ मूढोपि

मुच्यते जंतुर्यथा नावाश्रितो जनाः ॥८६॥
तत्प्रसादेन यं लब्ध्वा मत्संवाबहुलं य
था ॥ निष्कामेनैव भोक्तव्यं सदा संतुष्ट
२४
चेतसा ॥ ८७ ॥ यत्रैव तिष्ठते सोपि सदे
२४
त्राः पुण्य भाजनं ॥ मुक्तस्य लक्षणं दे

वीतवाग्रे कथितं मया ॥ ८८ ॥ उपदेशा
क्रमस्यासौ मया मार्गः प्रदर्शितः ॥ गुरु
रोवाभिधानं च सकलं तव कीर्तितं ॥ ८९ ॥
अनेन यद्भवेत्कार्यं तद्वदामि पुरंतप ॥
लोकोपकारकं प्रश्नं गुह्यं नो लौकिक

मिदं वदेत् ॥१०॥ लोकं स्वकर्ममो यांति
ज्ञानहीनाम हेश्वरी ॥ न तथा ज्ञानिनः
किंतु लभंते स्वपरं ध्रुवं ॥११॥ इदं तु
भक्तिभावेन पठते श्रूयते यदि ॥ लि
खिबा दीयते येन तस्यापि फलमुच्यतं ॥१२॥

२५

गुरुगीतामिदं देवी शुद्धतत्वं मयोदितं ॥
भवव्याधिविनाशार्थं जपेदेतत्सयत्नतः ॥१३॥
गुरुगीताक्षरैकैकं मंत्रराजमिमं जपेत् ॥
अन्ये च विविधा मंत्राः कलांनार्हंति षोड
शीं ॥१४॥ अनंतफलमाप्नोति गुरुगी

ताजपेनसः॥ सर्वपापौघनाशनं सर्वदा
रिद्धनाशनं॥१५॥ कालमृत्युभयहारं
सर्वसंकटनाशकं॥ यक्षराक्षसभूतादि
 चोरव्याघ्रभयापहं॥१६॥ नश्यंति व्या २९
धयः सर्वे विभूतेः सिद्धिदं भवेत्॥

मोहनादिकसिध्यर्थं जपेदेतद्धि ध्यानतः॥१७॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमानमुत्तमं॥कु
शासनं वा त्वजिनं चित्रं वा शुभकंबलं॥१८॥
शुक्लासिनं तु शांत्यर्थं वश्ये रक्तासनं प्रि
ये॥ अभिचारे कृष्णवर्णं पीतवर्णं धना

गमे॥९९॥ हिमुत्तरायां शातिःस्याद्भूसि
त्वं प्राङ्मुखीलभेत्॥ दक्षिणे मरणं शा
त्रोःपश्चिमेच धनागमः॥१००॥ मोह
नं सर्वभूतानां बंधमोक्षकरं भवेत्॥ दे
वाश्चास्ताधरास्तस्य राजापिच वशी भ

वेत्॥१॥ मुखस्तंभकरं यत्तद्गुणानांच
विवर्द्धनं॥ दुष्कर्मनाशनंचैव सत्कर्मसि
द्धिदं भवेत्॥२॥ असाध्यं साध्यते कार्यं
भवपत्रमकस्यापहं॥ दुःस्वप्ननाशनंचै
व सत्स्वप्नफलदायकं॥३॥ सर्वशांतिकरं

नित्यं वंध्यायाः पुत्रदं भवेत्॥ अवैधव्य
करस्त्रीणां सौभाग्यदायकं सदा॥४॥ आ
युरारोग्यमैश्वर्यं पुत्रपौत्रप्रवर्द्धनं॥ अका
मतः स्त्री विधवा जपन्मोक्षमवाप्नुयात्॥५॥
अवैधव्यं सकामेन लभते चान्यजन्मनि॥

२८

२८

सर्वविघ्नभयं दुःखं नाशयेत्तापहारकं॥६॥
सर्वबाधाप्रशमनं धर्मार्थकाममोक्षदं॥
येन यच्चिंतितं कार्यं स तत्प्राप्नोति ध्रु
वं॥७॥ कामितस्य कामधेनुः कल्पितस्य
कल्पद्रुमः॥ चिंतामणिश्चिंतितस्य सर्वमंगल

कारकं ॥८॥ मोक्षार्थी मोक्षमाप्नोति भोगा
र्थी भोगमाप्नुयात् ॥ पुत्रार्थी लभते पुत्रां
धनार्थी लभते धनं ॥९॥ जपेच्छास्त्रस्य

२८

सौरश्च गाणापत्यश्च वैष्णवः ॥ शैवश्च
सिद्धिदं देवी सत्यं सत्यं न संशयः ॥१०॥

अथ काम्ये जपस्थानं कथयामि वरानने ॥
समुद्रे वा सरीत्तीरे तीर्थे हरिहरालये ॥११॥
शक्तिदेवालये गोष्ठे सर्वदेवालये शुभे ॥
वटस्य धात्रीमूले वा मठे वृंदावने तथा ॥१२॥
स्मशाने बिल्वमूले वा चाश्वत्थोदुंबरे तथा ॥

३०

स्थित्वा संतुष्टवान् देवी जापकः सिद्धिमा
मुयात् ॥१३॥ शुभकर्माणि सर्वाणि तस्यैवे
संभवंति हि ॥ तेनानुग्रहितः सोपि त्रैलो
क्यविजयी भवेत् ॥१४॥ संसारमलनाशा
र्थं भवपाशनिवृत्तये ॥ गुरुगीतांभसिस्ना

३०

नं तत्वज्ञः कुरुते सदा ॥१५॥ स एवं गुरुव
साक्षात्पूज्यो भवति भूतले ॥ तस्य ज्ञानानि
सर्वाणि पवित्राणि न संशयः ॥१६॥ स एव
मुक्तः शुद्धो सो देवैरपि सुपूजितः ॥ तस्मिन्
देवगणाः सर्वे तीर्थानि निवसंति च ॥१७॥

३१

असनस्थानाद्यानस्थः स्वसोज्ञात्रतिमानपि॥ अश्वारूढो गजारूढो राजा रंकोथवा मुनिः॥१८॥ सशुचिः सर्वदा ज्ञानी गीताध्यायी सदेद्रिकः॥ तस्य दर्शनमात्रेण न पुनर्जन्म विद्यते॥१९॥ समुद्रेच यथा तोयं क्षी

३१

रे क्षीरं जले जलं॥ भिन्ने कुंभे यथाकाशं तथात्मा परमात्मनि॥२०॥ ऐक्येन रमते ज्ञानी यत्र यत्र दिवानिशं॥ गुरुवाक्यामृतं पीत्वा निःसंदेह परो भवेत्॥२१॥ गुरुभक्तिपरो देवी जीवन्मुक्तः स एव हि॥ तं यो

गीर्डांप्रयत्नेन सद्भावेन भ०जेत्तथा ॥२२॥
भुक्तिमुक्त्यादयः सर्वास्तल्लिह्वायेवसं
तितां ॥ ज्ञापानुग्रहसामर्थ्यात्सपूज्योना
त्रसंशयः ॥२३॥ अनेन प्राणिनः सर्वेगु
रुगीताजपेनतु ॥ प्राप्नुवंतिफलासिद्धिं

भुक्तिमुक्तिनसंशयः ॥२४॥ सत्यंसत्यंपु
नः सत्यं ध धर्मसांख्यंमयोदितं ॥ गुरुगीस ता
मंनास्तिसत्यंसत्यंवरानने ॥२५॥ एकदेवे
कनिष्ठस्यचैकधर्मस्यपार्वती ॥ गुरोःपर
तरंनास्तिनास्तितत्वंगुरोःपरं ॥२६॥ माता

३१ धन्यापिता धन्या धन्योवंशः कुलं तथा॥
धन्याच वसुधा देवी गुरुभक्ताव तारत॥२७॥
सशरीरेंद्रियः प्राणाश्चार्यस्वजनबांधवा॥
ता मातापितृकुलंसर्वं गुरुदेव न संशयः॥२८॥ ॥३३॥
आकल्पजन्मतः कोठिजपव्रततपः क्रिया॥

नाः सर्वासफलादेवी गुरुसंतोष मात्र तः॥२९॥
विद्याधन मदेनैव मंदभाग्याश्रयेन्नरा॥
गुरुसेवा न कुर्वंति सत्यं सत्यं वरानने॥३०॥
ब्रह्माविष्णुमहेशादि देवर्षी पितृकिंन्नराः॥
सिद्धचारणगंधर्वाअन्येपि मुनयोजना॥३१॥

संतुष्टास्तु प्रसंन्नाश्च गुरुभक्त्या भवंति हि ॥ फलपुष्पाणि संधत्ते मूलसिक्तं जलं यथा ॥ २२ ॥ गुरुभावः परं तीर्थमन्यतीर्थं निरर्थकं ॥ सर्वतीर्थफलं देवी तत्पादाब्जे च वर्त्तते ॥ २३ ॥ इदं रहस्यं नो वाच्यं न वा

ग्रे कथितं मया ॥ गोप्यं कुरु प्रयत्नेन ममाज्ञेयं प्रियसति ॥ २४ ॥ स्वामिमुख्यगणेशादिन् वैष्णवादिश्च पार्वती ॥ मनसापि न वक्तव्या गुरुगीता कदाचन ॥ २५ ॥ अवंचकस्य पक्वस्य श्रद्धायुक्तस्य सर्वदा ॥ वक्तव्य

२५

मिदमव्यक्तं गुरुगीतं प्रमोदकं ॥२६॥
अभक्तो वंचको धूर्त्तः पाखंडी नास्ति
कः खलः ॥ इदं तस्मै न वक्तव्यं ममाज्ञ
यं शुभानने ॥२७॥ इति श्रीस्कंदपुराणे

२५

ईश्वरपार्वतिसंवादे गुरुगीतास्तव
संपूर्ण ॥ श्रीसद्गुरुनाथार्पणमस्तु ॥
शके १७९४ अंगिरानाम संवत्सरे अ
धि कष्ठम एकादश्यां लेखनेनालं ॥

॥ इदं पुस्तकं गुरुगीतासंपूर्णं॥